# ५. पादुका सहस्रम् - प्रतिप्रस्थान पद्धतिः (२०)

प्रशस्ते रामपादाभ्यां पादुके पर्युपास्महे ।
आनृशंस्यं ययोरासी दाश्रितेष्वन वग्रहम् ॥ ५.१॥ १२१॥

भृशातुर सहोदर प्रणय खण्डन स्वैरिणा
पदेन किमनेन मे वनमि हावना दिच्छता ।
इतीव परिहाय तन्निववृते स्वयं यत्पुरा
पदत्रमिद माद्रिये धृत जगत्रयं रङ्गिणः ॥ ५.२॥ १२२॥

दशवदन विनाशं वाञ्छतो यस्य चक्रे
दशरथ मनघोक्तिं दण्डकारण्य यात्रा ।
स च भरत विमर्दे सत्यसन्ध स्त्वयाऽऽसीत्
रघुपति पदरक्षे राजधानीं प्रयान्त्या ॥ ५.३॥ १२३॥

अभ्युपेत विनिवृत्ति साहसा देवि रङ्गपति रत्नपादुके ।
अत्यशेत भवती महीयसा पारतन्त्र्य विभवेन मैथिलीम् ॥ ५.४॥ १२४॥

अव्याहतां रघुपते र्वहतः प्रतिज्ञाम्
अंसाधिरोहण रसे विहते धरण्याः ।
प्रादा न्निवृत्य भवती मणिपादरक्षे
स्पर्शं पदेन विगत व्यवधान खेदम् ॥ ५.५॥ १२५॥

मन्त्राभिषेक विरहाद्व्रजता विशुद्धिं
संस्कार वर्जन वशादभि संस्कृतेन ।
मूर्ध्ना निनाय भरतो मणिपादुके त्वां
रामाज्ञया विनिहिता मिव राज्यलक्ष्मीम् ॥ ५.६॥ १२६॥

रक्षार्थमस्य जगतो मणिपादरक्षे
रामस्य पादकमलं समये त्यजन्त्योः ।
किं दुष्करं तव विभूति परिग्रहो वा
किं वा विदेह दुहितुः कृपणा दशा सा ॥ ५.७॥ १२७॥

सीता सखस्य सहसा चरणारविन्दात्
भक्त्या नते कृतपदा भरतोत्तमाङ्गे ।
आरुह्य नागमभितो भवती वितेने
मायूर चामर भरं मणिरश्मिजालैः ॥ ५.८॥ १२८॥

मूर्ध्ना मुकुन्द पदरक्षिणि बिभ्रतस्त्वाम्
आविर्मदस्य रघुवीर मदावलस्य ।
आमोदिभिः सपदि दानजलप्रवाहैः
लेभे चिराद्वसुमती रुचिरं विलेपम् ॥ ५.९॥ १२९॥

आशाः प्रसाधयितु मम्ब तदा भवत्यां

दैवा दकाण्ड शरदीव समुत्थितायाम् ।
स्तोका वशेष सलिलाः सहसा बभूवुः
साकेत यौवत विलोचन वारिवाहाः ॥ ५.१०॥ १३०॥

अन्ते वसन्न चरमस्य कवेः स योगी
वन्यान्प्रगृह्य विविधा नुपदाविशेषान् ।
आतस्थुषीं रघुकुलोचित मौपवाह्यं
प्रत्युज्जगाम भवतीं भरतोपनीताम् ॥ ५.११॥ १३१॥

मातस्त्व दागमन मङ्गल दर्शिनीनां
साकेत पक्ष्मल दृशां चटुलाक्षि भृङ्गैः ।
जातानि तत्र सहसा मणिपादरक्षे
वातायनानि वदनैः शतपत्रितानि ॥ ५.१२॥ १३२॥

साकेत सीम्नि भवती मणिपादरक्षे
माङ्गल्य लाज निकरै रवकीर्यमाणा ।
कीर्ति स्वयंवर पते र्भरतस्य काले
वैवाहिकी जननि वह्निशिखेव रेजे ॥ ५.१३॥ १३३॥

छत्रेन्दु मण्डलवती मणिपादुके त्वं
व्याधूत चामर कलाप शरप्रसूना ।
सद्यो बभूविथ समग्र विकास हेतुः

साकेत पौरवनिता नयनोत्पलानाम् ॥ ५.१४॥ १३४॥

प्रैक्षन्त वक्त्रै र्मणिपादरक्षे शत्रुञ्जयं शैल मिवाधिरूढाम् ।
रामाभिधान प्रतिपन्न हर्षै रुत्तानितै रुत्तरकोसला स्त्वाम् ॥ ५.१५॥ १३५॥

द्रष्टुं तदा राघव पादरक्षे सीतामिव त्वां विनिवर्तमानाम् ।
आसन्नयोध्या पुरसुन्दरीणा मौत्सुक्य लोलानि विलोचनानि ॥ ५.१६॥ १३६॥

आस्थाय तत्र स्फुट बिन्दुनादं स्तम्बेरमं तादृश सन्निवेशम् ।
अदर्शयस्त्वं पुरमध्यभागे पादावनि त्वत्प्रणवाश्रयत्वम् ॥ ५.१७॥ १३७॥

दशग्रीव स्तम्बे रमदलन दुर्दान्त हृदये
विहार स्वाच्छन्द्या द्विशति रघुसिंहे वनभुवम् ।
स्वावात्सल्य क्रोडी कृत भरत शाबैव भवती
निराबाधां पादावनि न विजहौ कोसलगुहाम् ॥ ५.१८॥ १३८॥

कैकेयी वरदान दुर्दिन निरालोकस्य लोकस्य यत्
त्राणार्थं भरतेन भव्य मनसा साकेत मानीयते ।
रामत्याग सहै रसह्य विरहं रङ्गक्षितीन्द्रस्य तत्
पादत्राण मनन्य तन्त्र फणिते रापीड मीडीमहि ॥ ५.१९॥ १३९॥

समुपस्थिते प्रदोषे सहसा विनिवृत्य चित्रकूट वनात् ।

अभजत पुन र्जनपदं वत्सं धेनुरिव पादुके भवती ॥ ५.२०॥ १४०॥

इति कवितार्किक सिंहस्य सर्वतन्त्र स्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य श्रीमद्वेदान्ताचार्यस्य कृतिषु श्रीरङ्गनाथ पादुकासहस्रे प्रतिप्रस्थान पद्धतिः पञ्चमी ॥